# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा–अक्टूबर, २०१९

<table>
<tr><td>कक्षा –आचार्य–२ (SEM-३)</td><td rowspan="3">प्रश्नपत्रम् – ४<br>(C.C- 5.3.9 )<br>सन्दर्भग्रन्थः– शक्तिवादः</td><td rowspan="2">गुणाः – ७०</td></tr>
<tr><td>विषयः – नव्यन्यायः</td></tr>
<tr><td>दिनाङ्कः – १२/१०/२०१९</td><td>समयः– ३ तः ६</td></tr>
</table>

**(विभागः-1)**

**प्र-1 एकः प्रश्नः समाधेयः ।** **05**

1. पदवृत्तेः विभागपुरस्सरं उद्देशभागो वर्ण्यताम् ।
2. यथाग्रन्थं पदार्थसामान्यलक्षणं प्रतिपाद्यताम् ।

**प्र-2 एकः प्रश्नः समाधेयः ।** **10**

1. 'सङ्केतो लक्षणा चार्थे पदवृत्तिः' विशदयत ।
2. सोदाहरणं परिभाषालक्षणं व्याख्यात ।

**(विभागः-2)**

**प्र-3 एकः प्रश्नः समाधेयः ।** **05**

1. यथाग्रन्थं तात्पर्यज्ञानविचारः क्रियताम् ।
2. ईश्वरसङ्केतस्य शक्तित्वे अनुपपत्तिम् उपपादयत ।

**प्र-4 एकः प्रश्नः समाधेयः ।** **10**

1. "पदज्ञाने पदानां शक्तिः न तु पदार्थे" व्याख्यात ।
2. यथाग्रन्थं मीमांसकमतं प्रतिपाद्यताम् ।

**(विभागः-3)**

**प्र-5 एकः प्रश्नः समाधेयः ।** **05**

1. क्रोडपत्रे वृत्तित्वानुगमादिविचारः क्रियताम् ।
2. घटादिपदस्य "पदार्थताऽवच्छेदकीभूतघटत्वादिविशिष्ट एव शक्तिर्न तु तदुपलक्षिते" व्याख्यात ।

**प्र-6 एकः प्रश्नः समाधेयः ।** **10**

1. "जात्याकृतिविशिष्टः पदार्थः" व्याख्यात ।
2. यथाग्रन्थं पदार्थसंसर्गस्य वाच्यतां विशदयत ।

(विभागः-4)

**प्र-7 एकः प्रश्नः समाधेयः।** **05**

1. सोदाहरणं वाच्यवाचकभावं प्रतिपादयत।
2. केन रूपेण शक्तिधीहेतुता ? व्याख्यात।

**प्र-8 एकः प्रश्नः समाधेयः।** **10**

1. संक्षिप्य सामान्यकाण्डस्य विवरणं कुरुत।
2. निर्विकल्पकत्वञ्च तदंशे सामान्यतो निष्प्रकारकत्वं व्याख्यात।

**प्र-9 दश प्रश्नाः समाधेयाः।** **10**

1. का नाम वृत्तिः ?
2. कः धात्वर्थः ?
3. आधुनिकशक्त्या पदार्थबोधकं पदं किमुच्यते ?
4. का नाम लक्षणा ?
5. को नाम डित्थः ?
6. अन्विताभिधानवादिनः के ?
7. मञ्चाः क्रोशान्तीत्यादौ का लक्षणा ?
8. वृत्तिशब्देन कः अर्थो लभ्यते ?
9. नामकरणं कदा कर्तव्यम् ?
10. संसर्गांशे के शक्तिमङ्गीकुर्वन्ति ?
11. तात्पर्यशक्तित्ववादिनः के ?
12. घटादिपदस्य कुत्र शक्तिः ?
13. ग्रन्थे कति काण्डाः सन्ति ?
14. शक्तिपक्षे नैयायिकानां किमभिप्रायः ?
15. ग्रन्थकारः कः ?

उत्तराणि

1. शक्तिलक्षणान्यतरसम्बन्धरूपा।
2. वाच्यवाचकादिपदं ईश्वरेच्छाया बोधजनकत्वेन या विषयता सैव धात्वर्थः।
3. पारिभाषिकम्।
4. लक्षणा शक्यसम्बन्धस्तात्पर्यानुपपत्तितः।
5. श्यामरूपो युवा विद्वान् बलवान् धार्मिकप्रियः। सर्वशास्त्रप्रवक्ता च डित्थ इत्यभिधीयते।
6. मीमांसकाः।
7. अजहल्लक्षणा।
8. पदप्रतिपाद्यार्थो प्राप्यते।
9. द्वादशे अहनि पिता नाम कुर्यात्।
10. प्राभाकराः।
11. कुमारिलभाट्टाः।
12. पदार्थतावच्छेदकीभूतघटत्वादिविशिष्य एव शक्तिर्न तु घटत्वोपलक्षिते।
13. ग्रन्थे कति काण्डाः सन्ति ? त्रयः 1,सामान्य 2, विशेष 3, परिशिष्ट ।
14. जात्याकृतिविशष्टव्यक्तौ शक्तिः।
15. गदाधरभट्टाचार्यः।